# Raghuvansha 17 by Kalidas

# રઘુવંશં સર્ગઃ ૧૭ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha17

File name : raghuvansha17.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : November 11, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧૭ કાલિદાસકૃતમ્

અતિથિં નામ કાકુત્સ્થાત્પુત્રં પ્રાપ કુમુદ્વતી ।
પશ્ચિમાદ્યામિનીયામાત્પ્રસાદમિવ ચેતના ॥ ૧૭-૧ ॥

સ પિતુઃ પિતૃમાન્વંશં માતુશ્ચાનુપમદ્યુતિઃ ।
અપુનાત્સેવિતેવોભૌ માર્ગાવુત્તરદક્ષિણૌ ॥ ૧૭-૨ ॥

તમાદૌ કુલવિદ્યાનામર્થમર્થવિદાં વરઃ ।
પશ્ચાત્પાર્થિવકન્યાનાં પાણિમગ્રાહયત્પિતા ॥ ૧૭-૩ ॥

જાત્યસ્તેનાભિજાતેન શૂરઃ શૌર્યવતા કુશઃ ।
અમન્યૈતકમાત્માનમનેકં વશિના વશી ॥ ૧૭-૪ ॥

સ કુલોચિતમિન્દ્રસ્ય સાહાયકમુપેયિવાન્ ।
જઘાન સમરે દૈત્યં દુર્જયં તેન ચાવધિ ॥ ૧૭-૫ ॥

તં સ્વસા નાગરાજસ્ય કુમુદસ્ય કુમુદ્વતી ।
અન્વગાત્કુમુદાનન્દં શશાઙ્કમિવ કૌમુદી ॥ ૧૭-૬ ॥

તયોર્દિવસ્પતેરાસીદેકઃ સિંહાસનાર્ધભાક્ ।
દ્વિતીયાપિ સખી શચ્યાઃ પારિજાતાંશભાગિની ॥ ૧૭-૭ ॥

તદાત્મસંભવં રાજ્યે મન્ત્રિવૃદ્ધાઃ સમાદધુઃ ।
સ્મરન્તઃ પશ્ચિમામાજ્ઞાં ભર્તુઃ સઙ્ગ્રામયાયિનઃ ॥ ૧૭-૮ ॥

તે તસ્ય કલ્પયામાસુરભિષેકાય શિલ્પિભિઃ ।
વિમાનં નવમુદ્વેદિ ચતુઃસ્તમ્ભપ્રતિષ્ઠિતમ્ ॥ ૧૭-૯ ॥

તત્રૈનં હેમકુમ્ભેષુ સંભૃતૈસ્તીર્થવારિભિઃ ।
ઉપતસ્થુઃ પ્રકૃતયો ભદ્રપીઠોપવેશિતમ્ ॥ ૧૭-૧૦ ॥

નદદ્ભિઃ સ્નિગ્ધગંભીરં તૂર્યૈરાહતપુષ્કરૈઃ ।
અન્વમીયત કલ્યાણં તસ્યાવિચ્છિન્નસંતતિ ॥ ૧૭-૧૧ ॥

દૂર્વાયવાઙ્કુરપ્લક્ષત્વગભિન્નપુટોત્તરાન્ ।
જ્ઞાતિવૃદ્ધૈઃ પ્રયુક્તાન્સ ભેજે નીરાજનાવિધીન્ ॥ ૧૭-૧૨ ॥

પુરોહિતપુરોગાસ્તં જિષ્ણું જૈત્રૈરથર્વભિઃ ।
ઉપચક્રમિરે પૂર્વમભિષેક્તું દ્વિજાતયઃ ॥ ૧૭-૧૩ ॥

તસ્યૌઘમહતી મૂર્ધ્નિ નિપતન્તી વ્યરોચત ।
સશબ્દમભિષેકશ્રીર્ગઙ્ગેવ ત્રિપુરદ્વિષઃ ॥ ૧૭-૧૪ ॥

સ્તૂયમાનઃ ક્ષણે તસ્મિન્નલક્ષ્યત સ બન્દિભિઃ ।
પ્રવૃદ્ધ ઇવ પર્જન્યઃ સારઙ્ગૈરભિનન્દિતઃ ॥ ૧૭-૧૫ ॥

તસ્ય સન્મન્ત્રપૂતાભિઃ સ્નાનમદ્ભિઃ પ્રતીચ્છતઃ ।
વવૃધે વૈદ્યુતસ્યાગ્નેર્વૃષ્ટિસેકાદિવ દ્યુતિઃ ॥ ૧૭-૧૬ ॥

સ તાવદભિષેકાન્તે સ્નાતકેભ્યો દદૌ વસુ ।
યાવતૈષાં સમાપ્યેરન્યજ્ઞાઃ પર્યાપ્તદક્ષિણાઃ ॥ ૧૭-૧૭ ॥

તે પ્રીતમનસસ્તસ્મૈ યામાશિષમુદૈરયન્ ।
સા તસ્ય કર્મનિર્વૃત્તૈર્દૂરં પશ્ચાત્કૃતા ફલૈઃ ॥ ૧૭-૧૮ ॥

બન્ધચ્છેદં સ બદ્ધાનાં વધાર્હાણામવધ્યતામ્ ।
ધુર્યાણાં ચ ધુરો મોક્ષમદોહં ચાદિશદ્ગવામ્ ॥ ૧૭-૧૯ ॥

ક્રીડાપતત્રિણોપ્યસ્ય પઞ્જરસ્થાઃ શુકાદયઃ ।
લબ્ધમોક્ષાસ્તદાદેશાદ્યથેષ્ટગતયોઽભવન્ ॥ ૧૭-૨૦ ॥

તતઃ કક્ષ્યાન્તરન્યસ્તં ગજદન્તાસનં શુચિ ।
સૂત્તરચ્છદમધ્યાસ્ત નેપથ્યગ્રહણાય સઃ ॥ ૧૭-૨૧ ॥

તં ધૂપાશ્યાનકેશાન્તં તોયનિર્ણિક્તપાણયઃ ।
આકલ્પસાધનૈસ્તૈસ્તૈરુપસેદુઃ પ્રસાધકાઃ ॥ ૧૭-૨૨ ॥

તેઽસ્ય મુક્તાગુણોન્નદ્ધં મૌલિમન્તર્ગતસ્રજમ્ ।
પ્રત્યૂપુઃ પદ્મરાગેણ પ્રભામણ્ડલશોભિના ॥ ૧૭-૨૩ ॥

ચન્દનેનાઙ્ગરાગં ચ મૃગનાભિસુગન્ધિના ।
સમાપય્ય તતશ્ચક્રુઃ પત્રં વિન્યસ્તરોચનમ્ ॥ ૧૭-૨૪ ॥

આમુક્તાભરણઃ સ્રગ્વી હંસચિહ્નદુકૂલવાન્ ।
આસીદતિશયપ્રેક્ષ્યઃ સ રાજ્યશ્રીવધૂવરઃ ॥ ૧૭-૨૫ ॥

નેપથ્યદર્શિનશ્છાયા તસ્યાદર્શે હિરણ્મયે ।
વિરરાજોદિતે સૂર્યે મરૌ કલ્પતરોરિવ ॥ ૧૭-૨૬ ॥

સ રાજકકુદવ્યગ્રપાણિભિઃ પાર્શ્વવર્તિભિઃ ।
યયાવુદીરિતાલોકઃ સુધર્માનવમાં સભામ્ ॥ ૧૭-૨૭ ॥

વિતાનસહિતં તત્ર ભેજે પૈતૃકમાસનમ્ ।
ચૂડામણિભિરુદ્ઘૃષ્ટં પાદપીઠં મહીક્ષિતામ્ ॥ ૧૭-૨૮ ॥

શુશુભે તેન ચાક્રાન્તં મઙ્ગલાયતનં મહત્ ।
શ્રીવત્સલક્ષણં વક્ષઃ કૌસ્તુભેનેવ કૈશવમ્ ॥ ૧૭-૨૯ ॥

બભૌ ભૂયઃ કુમારત્વાદાધિરાજ્યમવાપ્ય સઃ ।
રેખાભાવાદુપારૂઢઃ સામગ્ર્યમિવ ચન્દ્રમાઃ ॥ ૧૭-૩૦ ॥

પ્રસન્નમુખરાગં તં સ્મિતપૂર્વાભિભાષિણમ્ ।
મૂર્તિમન્તમમન્યન્ત વિશ્વાસમનુજીવિનઃ ॥ ૧૭-૩૧ ॥

સ પુરં પુરહૂતશ્રીઃ કલ્પદ્રુમનિભધ્વજામ્ ।
ક્રમમાણશ્ચકાર દ્યાં નાગેનૈરાવતૌજસા ॥ ૧૭-૩૨ ॥

તસ્યૈકસ્યોચ્છ્રિતં છત્રં મૂર્ધ્નિ તેનામલત્વિષા ।
પૂર્વરાજવિયોગૌષ્ણ્યં કૃત્સ્નસ્ય જગતો હૃતમ્ ॥ ૧૭-૩૩ ॥

ધૂમાદગ્નેઃ શિખાઃ પશ્ચાદુદયાદંશવો રવેઃ ।
સોઽતીત્ય તેજસાં વૃત્તિં સમમેવોત્થિતો ગુણૈઃ ॥ ૧૭-૩૪ ॥

તં પ્રીતિવિશદૈર્નેત્રૈરન્વયુઃ પૌરયોષિતઃ ।
શરત્પ્રસન્નૈર્જ્યોતિર્ભિર્વિભાવર્ય ઇવ ધ્રુવમ્ ॥ ૧૭-૩૫ ॥

અયોધ્યાદેવતાશ્ચૈનં પ્રશસ્તાયતનાર્ચિતાઃ ।
અનુદધ્યુરનુધ્યેયં સાંનિધ્યૈઃ પ્રતિમાગતૈઃ ॥ ૧૭-૩૬ ॥

યાવન્નાશ્યાયતે વેદિરભિષેકજલાપ્લુતા ।
તાવદેવાસ્ય વેલાન્તં પ્રતાપઃ પ્રાપ દુઃસહઃ ॥ ૧૭-૩૭ ॥

વસિષ્ઠસ્ય ગુરોર્મન્ત્રાઃ સાયકાસ્તસ્ય ધન્વિનઃ ।
કિં તત્સાધ્યં યદુભયે સાધયેયુર્ન સંગતાઃ ॥ ૧૭-૩૮ ॥

સ ધર્મસ્થસખઃ શશ્વદર્થિપ્રત્યર્થિનાં સ્વયમ્ ।

દદર્શ સંશયચ્છેદ્યાન્વ્યવહારાનતન્દ્રિતઃ ॥ ૧૭-૩૯ ॥

તતઃ પરમભિવ્યક્તસૌમનસ્યનિવેદિતૈઃ ।
યુયોજ પાકાભિમુખૈર્ભૃત્યાન્વિજ્ઞાપનાફલૈઃ ॥ ૧૭-૪૦ ॥

પ્રજાસ્તદ્ગુરુણા નદ્યો નભસેવ વિવર્ધિતાઃ ।
તસ્મિંસ્તુ ભૂયસીં વૃદ્ધિં નભસ્યે તા ઇવાયયુઃ ॥ ૧૭-૪૧ ॥

યદુવાચ ન તન્મિથ્યા યદ્દદૌ ન જહાર તત્ ।
સોઽભૂદ્ભગ્નવ્રતઃ શત્રૂનુદ્ધૃત્ય પ્રતિરોપયન્ ॥ ૧૭-૪૨ ॥

વયોરૂપવિભૂતીનામેકૈકં મદકારણમ્ ।
તાનિ તસ્મિન્સમસ્તાનિ ન તસ્યોત્સિષિચે મનઃ ॥ ૧૭-૪૩ ॥

ઇત્થં જનિતરાગાસુ પ્રકૃતિષ્વનુવાસરમ્ ।
અક્ષોભ્યઃ સ નવોઽપ્યાસીદ્દૃઢમૂલ ઇવ દ્રુમઃ ॥ ૧૭-૪૪ ॥

અનિત્યાઃ શત્રવો બાહ્યા વિપ્રકૃષ્ટાશ્ચ તે યતઃ ।
અતઃ સોઽભ્યન્તરાન્નિત્યાઞ્ષટ્પૂર્વમજયદ્રિપૂન્ ॥ ૧૭-૪૫ ॥

પ્રસાદાભિમુખે તસ્મિંશ્ચપલાપિ સ્વભાવતઃ ।
નિકષે હેમરેખેવ શ્રીરાસીદનપાયિની ॥ ૧૭-૪૬ ॥

કાતર્યં કેવલા નીતિઃ શૌર્યં શ્વાપદચેષ્ટિતમ્ ।
અતઃ સિદ્ધિં સમેતાભ્યામુભાભ્યામન્વિયેષ સઃ ॥ ૧૭-૪૭ ॥

ન તસ્ય મણ્ડલે રાજ્ઞો ન્યસ્તપ્રણિધિદીધિતેઃ ।
અદૃષ્ટમભવત્કિંચિદ્વ્યભ્રસ્યેવ વિવસ્વતઃ ॥ ૧૭-૪૮ ॥

રાત્રિંદિવવિભાગેષુ યદાદિષ્ટં મહીક્ષિતામ્ ।
તત્સિષેવે નિયોગેન સ વિકલ્પપરાઙ્મુખઃ ॥ ૧૭-૪૯ ॥

મન્ત્રઃ પ્રતિદિનં તસ્ય બભૂવ સહ મન્ત્રિભિઃ ।
સ જાતુ સેવ્યમાનોઽપિ ગુપ્તદ્વારો ન સૂચ્યતે ॥ ૧૭-૫૦ ॥

પરેષુ સ્વેષુ ચ ક્ષિપ્તૈરવિજ્ઞાતપરસ્પરૈઃ ।
સોઽપસર્પૈર્જજાગાર યથાકાલં સ્વપન્નપિ ॥ ૧૭-૫૧ ॥

દુર્ગાણિ દુર્ગ્રહાણ્યાસંસ્તસ્ય રોદ્ધુરપિ દ્વિષામ્ ।
ન હિ સિંહો ગજાસ્કન્દી ભયાદ્ગિરિગુહાશયઃ ॥ ૧૭-૫૨ ॥

ભવ્યમુખ્યાઃ સમારમ્ભાઃ પ્રત્યવેક્ષ્યાનિરત્યયાઃ ।
ગર્ભશલિસધર્માણસ્તસ્ય ગૂઢં વિપેચિરે ॥ ૧૭-૫૩ ॥

અપથેન પ્રવવૃતે ન જાતૂપચિતોઽપિ સઃ ।
વૃદ્ધૌ નદીમુખેનૈવ પ્રસ્થાનં લવણામ્ભસઃ ॥ ૧૭-૫૪ ॥

કામં પ્રકૃતિવૈરાગ્યં સદ્યઃ શમયિતું ક્ષમઃ ।
યસ્ય કાર્યઃ પ્રતીકારઃ સ તન્નૈવોદપાદયત્ ॥ ૧૭-૫૫ ॥

શક્યેષ્વેવાભવદ્યાત્રા તસ્ય શક્તિમતઃ સતઃ ।
સમીરણસહાયોઽપિ નામ્ભઃપ્રાર્થી દવાનલઃ ॥ ૧૭-૫૬ ॥

ન ધર્મમર્થકામાભ્યાં બબાધે ન ચ તેન તૌ ।
નાર્થં કામેન કામં વ સોઽર્થેન સદૃશસ્ત્રિષુ ॥ ૧૭-૫૭ ॥

હીનાન્યનૃપકર્તૄણિ પ્રવૃદ્ધાનિ વિકુર્વતે ।
તેન મધ્યમશક્તીનિ મિત્રાણિ સ્થાપિતાન્યતઃ ॥ ૧૭-૫૮ ॥

પરાત્મનોઃ પરિચ્છિદ્ય શક્ત્યાદીનાં બલાબલમ્ ।
યયાવેભિર્બલિષ્ઠશ્ચેત્પરસ્માદાસ્ત સોઽન્યથા ॥ ૧૭-૫૯ ॥

કોશેનાશ્રયણીયત્વમિતિ તસ્યાર્થસંગ્રહઃ ।
અમ્બુગર્ભો હિ જીમૂતશ્ચાતકૈરભિનન્દ્યતે ॥ ૧૭-૬૦ ॥

પરકર્માપહઃ સોઽભૂદુદ્યુતઃ સ્વેષુ કર્મસુ ।
આવૃણોદાત્મનો રન્ધ્રં રન્ધ્રેષુ પ્રહરન્રિપૂન્ ॥ ૧૭-૬૧ ॥

પિત્રા સંવર્ધિતો નિત્યં કૃતાસ્ત્રઃ સાંપરાયિકઃ ।
તસ્ય દણ્ડવતો દણ્ડઃ સ્વદેહાન્ન વ્યશિષ્યત ॥ ૧૭-૬૨ ॥

સર્પસ્યેવ શિરોરત્નં નાસ્ય શક્તિત્રયં પરઃ ।
સ ચકર્ષ પરસ્માત્તદયસ્કાન્ત ઇવાયસમ્ ॥ ૧૭-૬૩ ॥

વાપીષ્વિવ સ્રવન્તીષુ વનેષૂપવનેષ્વિવ ।
સાર્થાઃ સ્વૈરં સ્વકીયેષુ ચેરુર્વેશ્મસ્વિવાદ્રિષુ ॥ ૧૭-૬૪ ॥

તપો રક્ષન્સ વિઘ્નેભ્યસ્તસ્કરેભ્યશ્ચ સંપદઃ ।
યથાસ્વમાશ્રમૈશ્ચક્રે વર્ણૈરપિ ષડંશભાક્ ॥ ૧૭-૬૫ ॥

ખનિભિઃ સુષુવે રત્નં ક્ષેત્રૈઃ સસ્યં વનૈર્ગજાન્ ।
દિદેશ વેતનં તસ્મૈ રક્ષાસદૃશમેવ ભૂઃ ॥ ૧૭-૬૬ ॥

સ ગુણાનાં બલાનાં ચ ષણ્ણાં ષણ્મુખવિક્રમઃ ।
બભૂવ વિનિયોગજ્ઞઃ સાધનીયેષુ વસ્તુષુ ॥ ૧૭-૬૭ ॥

ઇતિ ક્રમાત્પ્રયુઞ્જાનો રાજનીતિં ચતુર્વિધામ્ ।
આ તીર્થાદપ્રતીઘાતં સ તસ્યાઃ ફલમાનશે ॥ ૧૭-૬૮ ॥

કૂટયુદ્ધવિધિજ્ઞોઽપિ તસ્મિન્સન્માર્ગયોધિનિ ।
ભેજેઽભિસારિકાવૃત્તિં જયશ્રીર્વીરગામિની ॥ ૧૭-૬૯ ॥

પ્રાયઃ પ્રતાપભગ્નત્વાદરીણાં તસ્ય દુર્લભઃ ।
રણો ગન્ધદ્વિપસ્યેવ ગન્ધભિન્નાન્યદન્તિનઃ ॥ ૧૭-૭૦ ॥

પ્રવૃદ્ધૌ હ્રીયતે ચન્દ્રઃ સમુદ્રોઽપિ તથાવિધઃ ।
સ તુ તત્સમવૃદ્ધિશ્ચ ન ચાભૂત્તાવિવ ક્ષયી ॥ ૧૭-૭૧ ॥

સન્તસ્તસ્યાભિગમનાદત્યર્થં મહતઃ કૃશાઃ ।
ઉદધેરિવ જીમૂતાઃ પ્રાપુર્દાતૃત્વમર્થિનઃ ॥ ૧૭-૭૨ ॥

સ્તૂયમાનઃ સ જિહ્રાય સ્તુત્યમેવ સમાચરન્ ।
તથાપિ વવૃધે તસ્ય તત્કારિદ્વેષિણો યશઃ ॥ ૧૭-૭૩ ॥

દુરિતં દર્શનેન ઘ્નંસ્તત્ત્વાર્થેન નુદંસ્તમઃ ।
પ્રજાઃ સ્વતન્ત્રયાંચક્રે શશ્વત્સૂર્ય ઇવોદિતઃ ॥ ૧૭-૭૪ ॥

ઇન્દોરગતયઃ પદ્મે સૂર્યસ્ય કુમુદેંઽશવઃ ।
ગુણાસ્તસ્ય વિપક્ષેઽપિ ગુણિનો લેભિરેઽન્તરમ્ ॥ ૧૭-૭૫ ॥

પરાભિસંધાનપરં યદ્યપ્યસ્ય વિચેષ્ટિતમ્ ।
જિગીષોરશ્વમેધાય ધર્મ્યમેવ બભૂવ તત્ ॥ ૧૭-૭૬ ॥

એવમુદ્યન્પ્રભાવેણ શાસ્ત્રનિર્દિષ્ટવર્ત્મના ।
વૃષેવ દેવો દેવાનાં રાજ્ઞાં રાજા બભૂવ સઃ ॥ ૧૭-૭૭ ॥

પઞ્ચમં લોકપાલાનાં તમૂચુઃ સામ્યયોગતઃ ।
ભૂતાનાં મહતાં ષષ્ઠમષ્ટમં કુલભૂભૃતામ્ ॥ ૧૭-૭૮ ॥

દૂરાપવર્જિતચ્છત્રૈસ્તસ્યાજ્ઞાં શાસનાર્પિતામ્ ।
દધુઃ શિરોભિર્ભૂપાલા દેવાઃ પૌરંદરીમિવ ॥ ૧૭-૭૯ ॥

ઋત્વિજઃ સ તથાનર્ચ દક્ષિણાભિર્મહાક્રતૌ ।

યથા સાધારણીભૂતં નામાસ્ય ધનદસ્ય ચ ॥ ૧૭-૮૦ ॥

ઇન્દ્રાદ્વૃષ્ટિર્નિયમિતગદોદ્રેકવૃત્તિર્યમોઽભૂ-
દ્યાદોનાથઃ શિવજલપથઃ કર્મણે નૌચરાણામ્ ।
પૂર્વાપેક્ષી તદનુ વિદધે કોષવૃદ્ધિં કુબેર-
સ્તસ્મિન્દણ્ડોપનતચરિતં ભેજિરે લોકપાલાઃ ॥ ૧૭-૮૧ ॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસ-
કૃતાવતિથિવર્ણનં નામ સપ્તદશઃ સર્ગઃ ॥

Encoded and proofread by
Arvind Kolhatkar akolhatkar at rogers.com

---

*Raghuvansha 17 by Kalidas*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*